# Shri Yoganandacharyakritam Bhagavatanushasanam

# શ્રીયોગાનન્દાચાર્યકૃતં ભાગવતાનુશાસનમ્

## Document Information

Text title : Shri Yoganandacharyakritam Bhagavatanushasanam

File name : bhAgavatAnushAsanamyogAnandAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : yogAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીયોગાનન્દાચાર્યકૃતં ભાગવતાનુશાસનમ્

નત્ત્વા ભાષ્યકૃતં રામાનન્દાચાર્યં ચ રાઘવમ્ ।
કલ્યાણકારકં કુર્વે ભાગવતાનુશાસનમ્ ॥ ૧॥

આત્મીયમથ ચાત્માનં શ્રીરામાય સમર્પ્યતામ્ ।
રામે રમ્યં મમત્વં ચ સર્વં ત્યાક્ત્વા વિધીયતામ્ ॥ ૨॥

લાભેઽલાભે તથા દુઃખે સુખે માનેઽપમાનકે ।
દ્વન્દ્વે મિત્રે તથાઽમિત્રે સદા સામ્યં નિરીક્ષ્યતામ્ ॥ ૩॥

લોકદ્વયસુખાકાઙ્ક્ષા સર્વથા પરિહીયતામ્ ।
ચેતસિ ચ સ્થિતા સર્વા વાસના હિ નિરસ્યતામ્ ॥ ૪॥

રામનામામૃતં પીત્વા નિર્ભયેનાત્ર ભૂયતામ્ ।
યોગિધ્યાનાસ્પદં રામઃ સર્વદાઽથાનુચિન્ત્યતામ્ ॥ ૫॥

ગર્વં ત્યક્ત્વા હિ રામાગ્રે સદા દૈન્યમવાપ્યતામ્ ।
કાયેન રામકૈઙ્કર્યમ્પ મુક્તિદં સુવિધીયતામ્ ॥ ૬॥

શ્રીરામશ્ચાભિરામો હિ સર્વભૂતેષુ વીક્ષ્યતામ્ ।
ચિદચિદીશતત્ત્વાનાં સ્વરૂપમવબુધ્યતામ્ ॥ ૭॥

સત્યં પ્રિયં હિતં ચાથ સર્વદા ચાભિધીયતામ્ ।
અધર્મમપહાયાથ સદ્ધર્મશ્ચાવલમ્બ્યતામ્ ॥ ૮॥

તુલસીમાલિકે ધૃત્વા ચોર્ધ્વપુણ્ડ્રં વિધીયતામ્ ।
શ્રીરામચાપબાણાભ્યાં બાહુદ્વયં સમઙ્ક્યતામ્ ॥ ૯॥

પ્રાયશ્ચિત્તં હિ શાસ્ત્રેષુ યસ્ય ક્વાપિ ન દૃશ્યતે ।
ગાર્હસ્થ્યં તદ્ વિરક્તેન સર્વથા પરિહીયતામ્ ॥ ૧૦॥

વિશિષ્ટાદ્વૈતસિદ્ધાન્તો દોષશૂન્યોઽવબુધ્યતામ્ ।
પ્રસ્થાનતૃતયાનન્દભાષ્યં નિત્યં સુચિન્ત્યતામ્ ॥ ૧૧॥

વિધાય પૂજનં રામો દણ્ડવત્ સુપ્રણમ્યતામ્ ।
યથા રામસ્તથા નિત્યં સ્વાચાર્યઃ સમુપાસ્યતામ્ ॥ ૧૨॥

રામાનન્દાર્યશિષ્ય શ્રીયોગાનન્દાર્યનિર્મિતમ્ ।
કલ્યાણપરકં ભૂયાદ્ ભાગવતાનુશાસનમ્ ॥ ૧૩॥

ઇતિ શ્રીયોગાનન્દાચાર્યકૃતં ભાગવતાનુશાસનં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Yoganandacharyakritam Bhagavatanushasanam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*